# शाकहट्टम्




| | | |
|---|---|---|
| **सुधा** | – | रजत! चित्रे किम् पश्यसि? |
| **रजतः** | – | चित्रे अहम् फलानि पश्यामि। |
| **श्यामा** | – | अत्र कानि फलानि सन्ति? |

**रजतः** – अत्र पपीतक:, द्राक्षाफलम्, नारङ्गम्, नारिकेलं च सन्ति।

**रजनीशः** – किम् एतानि एव फलानि सन्ति?

**सुधा** – नहि, तरबूजम्, सेवम्, दाडिमम् इत्यादय: अपि सन्ति।

**श्यामा** – किम् चित्रे केवलं फलानि एव सन्ति?

**रजनीशः** – नहि, तत्र शाका: अपि सन्ति।

**रजतः** – किम् त्वम् शाकानाम् नामानि अपि जानासि?

**रजनीशः** – आम्, अत्र पुष्पशाकम्, पलाण्डु:, कारवेल्ल:, वृन्ताक:, अंगुलितोरिका आलुकम् च इत्यादय: शाका: सन्ति।

## मिलित्वा गायन्तु, अवगच्छन्तु आचरन्तु च

**अभिवादनशीलस्य नित्यं वृद्धोपसेविन:।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशोबलम्॥**



**भावार्थः**

य: बालक: प्रतिदिनं मातरं, पितरं, गुरुजनान्, ज्येष्ठान् च नमति, वृद्धानां च सेवां करोति, एतेषाम् आशीर्वादेन तस्य बालकस्य आयु: वर्धते, ज्ञानं वर्धते, यश: वर्धते, शक्ति: च वर्धते।

## अभ्यासः

1. **चित्राणि दृष्ट्वा नामानि लिखत–**

(क) एतत् ........................................ अस्ति।



(ख)



एतत् ........................................ अस्ति।

(ग) एतत् ........................................ अस्ति।



(घ)



एतत् ........................................ अस्ति।

(ङ) एतत् ........................................ अस्ति।



(च)



एतत् ........................................ अस्ति।

(छ) एतत् ........................................ अस्ति।



2. पञ्चानां फलानां पञ्चानां शाकानाम् च नामानि पाठात् चित्वा लिखन्तु–

| फलानि | शाकाः |
| --- | --- |
| .................................. | .................................. |
| .................................. | .................................. |
| .................................. | .................................. |
| .................................. | .................................. |
| .................................. | .................................. |

3. भवान् कानि फलानि शाकान् खादति चित्रैः सह तेषां नामानि अधः प्रदत्तस्थाने लिखन्तु–

पञ्चमः पाठः

# अस्माकम् प्रियमित्राणि

## ( पक्षिणः )




**रमा** – राजीव! अस्मिन् चित्रे त्वं किम् पश्यसि?

**राजीवः** – रमे! चित्रे तु अनेके खगाः सन्ति।

**उमा** – किम् त्वम् एतेषां नामानि जानासि?

**उमेशः** – आम्, अत्र मयूरः, बकः, कुक्कुटः च सन्ति।

**रमा** – तत्र शुकः, काकः, उलूकः च अपि सन्ति।

**राजीवः** – किम् चटका हंसः च न स्तः?

**उमा** – आम्, चित्रे चटका हंसः च स्तः। अत्र तु कपोतः पिकः च अपि स्तः।

**उमेशः** – अधुना वद, मयूरः किम् करोति?

**राजीवः** – मयूरः नृत्यति।

**रमा** – बकः कुत्र तिष्ठति?

**उमा** – बकः तु जले तिष्ठति।

**उमेशः** – अन्ये खगाः कुत्र तिष्ठन्ति?

**रमा** – अन्ये खगाः तु वृक्षस्य शाखासु तिष्ठन्ति।

## मिलित्वा गायन्तु, अवगच्छन्तु आचरन्तु च

**न कश्चित् कस्यचित् मित्रं न कश्चित् कस्यचित् रिपुः।**
**व्यवहारेण जायन्ते मित्राणि रिपवस्तथा॥**



### भावार्थः

संसारे कः अपि जनः अकारणम् एव कस्यचित् मित्रम् अथवा शत्रुः न भवति। जनानां व्यवहारेण एव तेषां मित्राणि शत्रवः च भवन्ति। अतः वयं सर्वैः सह विनम्रतायाः एव व्यवहारं कुर्याम।

## अभ्यासः

1. **चित्रं दृष्ट्वा खगस्य नाम लिखत–**

(क) एषः ........................................ अस्ति।



(ख) 

एषः ........................................ अस्ति।



(ग) एषः ........................................ अस्ति।

(घ) 

एषः ........................................ अस्ति।



(ङ) एषः ........................................ अस्ति।

(च) 

एषः ........................................ अस्ति।



(छ) एषः ........................................ अस्ति।

2. **मेलनं कुरुत–**

(क) शुकः श्वेतः

(ख) बकः कृष्णः

(ग) काकः हरितः

3. **उदाहरणानुसारं शब्दनिर्माणं कुरुत–**






4. **खगानां नामानि लिखत येषाम् अन्ते 'कः' वर्णः भवति–**

(क) ........पिकः........

(ख) ........................

(ग) ........................

(घ) ........................



5. **पाठे प्रदत्तं चित्रं दृष्ट्वा रिक्तस्थानानि पूरयत–**



(क) .................................. नृत्यति।

(ख) .................................. मधुरं गायति।

(ग) .................................. कूजति।

(घ) .................................. मरीचिकाम् खादति।

(ङ) .................................. जले तरति।

(च) .................................. रात्रौ जागर्ति।

(छ) .................................. मत्स्यं खादति।

6. **कस्यापि पक्षिणः चित्रम्/चित्राणि रचयित्वा तत्/तानि वर्णैः रञ्जयन्तु–**

## षष्ठः पाठः

# ये फलानि खादन्ति ते सुखिनः वसन्ति

एषा सुधा अस्ति।

सुधा किम् करोति?

सुधा **प्रातराशे** सेवफलं **खादति**।





एषः रजतः अस्ति।

रजतः किम् करोति?

रजतः प्रातःकाले कदलीफलं खादति।

एषा श्यामा अस्ति।

श्यामा किम् करोति?

श्यामा प्रातःकाले आम्रफलं खादति।





एषा लता अस्ति।

लता किम् करोति?

लता **मध्याह्ने** खर्बूजं खादति।

---

**शब्दार्थ–प्रातराशे**=नाश्ते में (at the time of breakfast), **खादति**=खाता है/खाती है ((he/she) eats), **मध्याह्ने**=दोपहर में (at noon)

एषः रजनीशः अस्ति।

रजनीशः किम् करोति?

रजनीशः मध्याह्ने दाडिमफलं खादति।





एषा दीपाली अस्ति।

दीपाली किम् करोति?

दीपाली मध्याह्ने तरबूजफलं खादति।



त्वम् मध्याह्ने किम् पिबसि?

**अहम्** मध्याह्ने नारिकेलजलं **पिबामि**।

**वयम् सर्वे सायंकाले फलानाम् रसम् पिबामः। सुखिनः वसामः।**



**शब्दार्थ–अहम्**=मैं (I), **पिबामि**=पीता हूँ/पीती हूँ ((I) drink)

## अभ्यासः

1. अस्माकम् आहारे फलानाम् महत्त्वम् अस्ति। फलानाम् रसेन वयं स्वस्थाः भवामः। भवान्/भवती वदतु लिखतु च यत् कदा किं खादति पिबति च।

   (क) ………अहम् प्रातःकाले दुग्धम् पिबामि।………

   (ख) ……………………………………………………

   (ग) ……………………………………………………

   (घ) ……………………………………………………

2. चित्राणि दृष्ट्वा मञ्जूषायाः चित्वा लिखन्तु कः कालः?



(क) ……………………………………



(ख) ……………………………………



(ग) ……………………………………



(घ) ……………………………………

**मञ्जूषा**

रात्रिकालः, प्रातःकालः, मध्याह्नकालः, सायंकालः

3. **उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयन्तु–**

**( अ ) उदाहरणम्–**

त्वम् पठसि (पठ्)

युवाम् पठथः

यूयम् पठथ

(क) त्वम् ..................................। (हस्)

युवाम् ..................................।

यूयम् ..................................।

(ख) त्वम् ..................................। (क्रीड)

युवाम् ..................................।

यूयम् ..................................।

(ग) त्वम् ..................................। (भ्रम्)

युवाम् ..................................।

यूयम् ..................................।

(घ) त्वम् ..................................। (चल्)

युवाम् ..................................।

यूयम् ..................................।

(ङ) त्वम् ..................................। (लिख्)

युवाम् ..................................।

यूयम् ..................................।

(च) त्वम् ..................................। (वद्)

युवाम् ..................................।

यूयम् ..................................।

(छ) त्वम् ..................................। (नम्)

युवाम् ..................................।

यूयम् ..................................।

**( आ ) मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानि पूरयत–**

**मञ्जूषा**

यूयम्, त्वम्, युवाम्, युवाम्, यूयम्, त्वम्

(क) .................................. गच्छसि।

.................................. खादथः।

.................................. धावथ।

(ख) .................................. चलसि।

.................................. कूर्दथः।

.................................. भ्रमथ।

सप्तमः पाठः

# चित्रप्रदर्शनी

**रमा** – रमेश! अद्य रविवासरे भवान् कुत्र गच्छति?

**रमेशः** – रमे! अहम् विद्यालयम् गच्छामि।

**रमा** – किम् भवतः विद्यालये अद्य अवकाशः न अस्ति?

**रमेशः** – अवकाशः तु अस्ति परन्तु अद्य मम विद्यालये संस्कृतस्य चित्रप्रदर्शनी अस्ति।

**रमा** – किम् संस्कृतस्य चित्रप्रदर्शनी अस्ति! अहम् अपि द्रष्टुम् इच्छामि।

**रमेशः** – अवश्यम् आगच्छतु।

**( विद्यालयम् गत्वा )**




**रमेशः** – पश्यतु एतानि चित्राणि नामानि अपि च वदतु।

**रमा** – आम्, वदामि। एतत् पुष्पम्, एषः वृक्षः, पादपः, विमानम्, संगणकम् अपि अस्ति। सर्वाणि चित्राणि सुन्दराणि सन्ति। भवतः विद्यालयः अपि सुन्दरः अस्ति।

**रमेशः** – धन्यवादः। आगच्छ अधुना चलावः।

## अभ्यासः

1. विद्यालये अनेकानि चित्राणि सन्ति। एतेषाम् नामानि संस्कृतेन अत्र लिखन्तु–

.................................   .................................   .................................

.................................   .................................   .................................

.................................   .................................   .................................

.................................   .................................

2. अत्र विभिन्नचित्राणि सन्ति। मञ्जूषायाम् नामानि अपि लिखितानि सन्ति। एतेभ्यः उचितपदम् चित्वा चित्राणाम् अधः लिखन्तु–

**मञ्जूषा**

व्यजनम्, पुस्तकम्, दूरदर्शनम्, गृहम्, कन्दुकम्,
नौका, दीपकः, पर्वतः, वृक्षः, कृषकः



(क) ............................



(ख) ............................



(ग) ............................



(घ) ............................



(ङ) ............................



(च) ............................



(छ) ..............................



(ज) ..............................



(झ) ..............................



(ञ) ..............................

**3. प्रश्नान् पठित्वा वदन्तु लिखन्तु च 'आम्' अथवा 'न'–**

**उदाहरणम्** – किम् रमेशः विद्यालयम् गच्छति? ..........आम्..........

(क) किम् विद्यालयः सुन्दरः अस्ति? ..............................

(ख) किम् विद्यालये विज्ञानस्य चित्रप्रदर्शनी अस्ति? ..............................

(ग) किम् चित्राणि सुन्दराणि सन्ति? ..............................

(घ) किम् सर्वासु कक्षासु चित्राणि सन्ति? ..............................

(ङ) किम् रमेशः ग्रामं गच्छति? ..............................